# कुवलयानन्दकारिकाः

## १-उपमा।

उपमा यत्र सादृश्यलक्षीरुल्लसति द्वयोः।
हंसीव कृष्ण! ते कीर्तिः स्वर्गंगामवगाहते।।

## २- प्रतीपम्।

प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम्।
त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः।।

## ३-अनन्वयम्।

उपमानोपमेयत्वं यदैकस्यैव वस्तुनः।
इन्दुरिन्दुरिव श्रीमान् इत्यादौ तदनन्वयः।।

## ४-रूपकम्।

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।
रूपकं तत्, त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः।।

## ५-उत्प्रेक्षा।

सम्भावना स्यादुत्प्रेक्षा वस्तु-हेतु-फलात्मना।
उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे।।

## ६-उल्लेखः।

(१) बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते।
स्त्रीभिःकामोर्तिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः।।

(२) एकेन बहुधोल्लेखेप्यसौ विषयभेदतः।
गुरुर्वचस्यर्जुनोयं कीर्तौ भीमः शरासने।।

## ७-दीपकम्।

वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः।
मदेन भाति कलभः प्रतापेन महीपतिः।।

## ८-तुल्ययोगिता।

वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता।
सङ्कुचन्ति सरोजानि स्वैरिणी वदनानि त।।

## ९-व्यतिरेकः।

व्यतिरेको विशेषच्चेदुपमानोपमययोः।
शैला इवोन्नता सन्तः किन्तु प्रकृतिकोमलाः।।

## १०-श्लेषः।

नानार्थसंश्रयः श्लेषः वर्ण्यावर्ण्योभयास्पदः ।
सर्वदो माधवः पायात् सः यो गङ्गामदीधरत्।।

## ११-अप्रस्तुतप्रशंसा।

अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया।
एकः कृती शकुन्तेषु योन्यं शक्रान्न याचते।।

## १२-काव्यार्थापत्तिः।

कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते।
स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम्।।

## १३-काव्यलिङ्गम्।

समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्।
जितोसि मन्द कन्दर्प मच्चित्तेस्ति त्रिलोचनः।।

## १४-अर्थान्तरन्यासः।

उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः।
हनूमानब्धिमतरद्दुष्करं किं महात्मनाम्।।

## १५-स्वभावोक्तिः।

स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्।
कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते।।